चम्पकं, क्ली, (चम्पति सदृगन्धं गच्छतीति । चम्प + खुल् ।) कदलीफलविशेषः । चाँपा कला इति भाषा । अस्य गुणाः । वातपित्तनाशित्वम् । गुरुत्वम् । वीर्य्यकारित्वम् । अतिशीतत्वम् । रसे पाके मधुरत्वञ्च । इति राजवल्लभः ॥ (चम्पकस्य इदम् । चम्पक + अण् । ततोऽणो लुक् ।) चम्पकपुष्पम् ॥ (सांख्यशास्त्रोक्तसिद्धिभेदः । यथा,—
"न्यायेन स्वयं परीक्षितमप्यर्थं तावन्न श्रद्धत्ते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवाद्यते । अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी चम्पकमुच्यते ॥")

चम्पकः, पुं, (चम्पयति सदृगन्धादिकं गच्छतीति । चम्प + खुल् ।) वृक्षविशेषः । चाँपा इति भाषा । तत्पर्य्यायः । चाम्पेयः २ हेमपुष्पकः ३ । इत्यमरः । २ । ४ । ६३ ॥ स्वर्णपुष्पः ४ शीतलच्छदः ५ सुभगः ६ भृङ्गमोही ७ शीतलः ८ भ्रमरातिथिः ९ सुरभिः १० दीपपुष्पः ११ स्थिरगन्धः १२ अतिगन्धकः १३ स्थिरपुष्पः १४ हेमपुष्पः १५ पीतपुष्पः १६ हेमाह्वः १७ सुकुमारः १८ वनदीपः १९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । दाहकुष्ठकण्डूव्रणनाशित्वम् । गुणाढ्यो राजचम्पकः । इति राजनिर्घण्टः ॥ कषायत्वम् । मधुरत्वम् । विषकृमिकृच्छ्रकफवातास्रपित्तनाशित्वञ्च । इति भावप्रकाशः ॥ पनसफलकोषैकदेशावयवश्च ॥

चम्पककलिका, स्त्री, (चम्पकस्य कलिका कोरकः ।) चम्पककोरकः । तत्पर्य्यायः । गन्धफली २ बहुगन्धा ३ गन्धमोदिनी ४ । इति राजनिर्घण्टः ॥

चम्पकचतुर्द्दशी, स्त्री, (चम्पकसाध्या चतुर्द्दशी । अस्यां चम्पकैः शिवपूजनात् शिवलोकप्राप्तिस्तथात्वम् ।) ज्यैष्ठशुक्लचतुर्द्दशी । यथा, ज्यैष्ठमासमुपक्रम्य मत्स्यसूक्ते ४५ पटले ।
"चतुर्द्दश्याञ्च शुक्लायां चम्पकैः पूजयेत् शिवम् ।
अयुतैर्वा सहस्रैर्वा शतैर्वा परमेश्वरि ! ॥
पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती ।
वृषस्थेन विशेषेण न भूयो जायते भुवि ॥
त्रिमध्वक्तैश्चम्पकैश्च सहस्रं जुहुयाच्छिशि ।
चयश्चिन्वरान् हन्ति हत्वा दोषाणि यानि च ॥
चम्पकचतुर्द्दशी ख्याता पूजयेद्वा सदाशिवम् ।
दशजन्मकृतं पापमर्च्चनादेव नश्यति ॥"
अन्यच्च ।
"चतुर्द्दश्याञ्च शुक्लायां ज्यैष्ठे मासि महेश्वरम् ।
चम्पकैः पूजयेत् भक्त्या शिवलोकमवाप्नुयात् ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥
अपि च ।
"ज्यैष्ठशुक्लचतुर्द्दश्यां पुष्पैश्चम्पकसम्भवैः ।
अर्च्चयित्वा महादेवं रुद्रलोके महीयते ॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

चम्पकरम्भा, स्त्री, (चम्पक इति नाम्ना प्रसिद्धा रम्भा । यद्वा, चम्पकपुष्पगन्धवद्गन्धविशिष्टा रम्भा ।) सुवर्णकदली । इति राजनिर्घण्टः ॥ (चाँपा कला । इति भाषा ॥ गुणादिकं चम्पकशब्दे द्रष्टव्यम् ॥)

चम्पकालुः, पुं, (चम्पकवत् चम्पकपुष्पवर्णवत् आलु रभ्यन्तरवीजकोषो यस्य । यद्वा, चम्पकं चम्पकवर्णं आलाति प्रतिरक्षतीति । आ + ला + मितद्र्वादित्वात् डुः ।) पनसः । इति भूरिप्रयोगः ॥

चम्पकुन्दः, पुं, (चम्पकवर्णःसन् उनत्तीति । उन्दी क्लेदने + अच् । पृषोदरादित्वात् अकारलोपः ।) मत्स्यभेदः । चाँदकुड़ा । इति भाषा । अस्य गुणाः । गुरुत्वम् । शुक्रकारित्वम् । मधुरत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥

चम्पकोषः, पुं, (चम्पश्चम्पक इव कोषो यस्य ।) पनसः । इति त्रिकाण्डशेषः ॥

चम्पा, स्त्री, (चम्पा नदी विद्यतेऽस्यामिति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । यद्वा, चम्पेन राज्ञो हरिश्चन्द्रस्य प्रपौत्रेण निर्म्मिता या पुरी । यदुक्तं भागवते ।९।८।१ ।
"हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्म्मिता ।
चम्पा पुरी........................॥")
कर्णपुरी । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । मालिनी २ लोमपादपूः ३ कर्णपूः ४ । इति हेमचन्द्रः । ४ । ४२ ॥ चम्पावती ५ चम्पापुरी ६ । इति शब्दरत्नावली ॥ (इयन्तु अङ्गदेशान्तर्गता । यदुक्तं हेमचन्द्रेण । ४ । २३ ।
"वङ्गास्तु हरिकेलीया अङ्गाश्चम्पोपलक्षिताः ॥"
तथा च महाभारते । १२ । ५ । ६—७ ।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरशार्दूल ! स राजासीत् सपत्नजित् ॥
पालयामास चम्पाञ्च कर्णः परबलार्द्दनः ।
दुर्य्योधनस्यानुमते तवापि विदितं तथा ॥"
इयमेव पुरा राज्ञो लोमपादस्य राजधानी आसीत् । इति रामायणम् ॥ अङ्गदेशस्थनदीविशेषः ॥)

चम्पाधिपः, पुं, (चम्पाया अधिप ईश्वरः ।) कर्णराजः । इति हेमचन्द्रः ॥

चम्पापुरी, स्त्री, (चम्पा एव पुरी ।) चम्पानगरी । इति शब्दरत्नावली ॥

चम्पालुः, पुं, (चम्पश्चम्पकस्तद्वत् कोशवर्णं आलाति आ + ला + डुः ।) पनसः । इति शब्दरत्नावली ॥

चम्पावती, स्त्री, (चम्पा तदाख्यया प्रसिद्धा नदी विद्यतेऽस्यामिति । चम्पा + मतुप् । मस्य वत्वम् ।) चम्पापुरी । इति शब्दरत्नावली ॥

चम्पूः, स्त्री, काव्यविशेषः । इति जटाधरः ॥ तल्लक्षणं यथा,—
"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते ॥"
इति साहित्यदर्पणे । ६ । २९८ ॥

चम्पेशः, पुं, (चम्पाया ईशः ।) कर्णराजः । इति त्रिकाण्डशेषः ॥

चम्पोपलक्षितः, पुं, (चम्पया नगर्य्या नद्या वा उपलक्षितः ।) अङ्गदेशः । इति हेमचन्द्रः । ४ । २३ ॥ तद्देशस्थे पुं भूम्नि ॥

चम्म, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-सेट् ।) चम्मति । इति दुर्गादासः ॥

चय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, चयते । इति दुर्गादासः ॥

चयः, पुं. (चीयते इति । चि + "एरच् ।" ३ । ३ । ५६ । इति कर्म्मणि अच् ।) वप्रम् । इत्यमरः । २ । २ । ३ ॥ तत्तु प्राकारादिमूलबन्धम् । यदुपरि प्राकारो निरूप्यते सः । पगार इति ख्यात इति केचित् । इति तट्टीकासारसुन्दरी ॥ दुर्गनगरे उद्धृतमृत्तिकास्तूपवद्धं यदुपरि प्राकारो निवेश्यते । तथाचार्थशास्त्रम् । खातमुद्धृतमृदा वप्रं कारयेत् तस्योपरि प्राकारमिति । इति भरतः ॥ समूहः । (यथा माघे । १ । ३ ।
"चयस्त्विषामित्यवधारितं पुरा ॥")
समाहृतिः । इति मेदिनी । ये, २१ ॥ प्राकारः । (यथा, महाभारते । ३ । १६० । ३७ ।
"शैलाभ्युच्छ्रयवता चयाट्टालकशोभिना ॥")
पीठम् । इति हेमचन्द्रः ॥ (दोषाणां सञ्चयप्रकोपप्रशमादिषु प्रकारविशेषः । तद्यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति ॥
हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।
प्रायेण प्रशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृट्टतौ कफः ।"
"चयकोपशमान् दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययम् ॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥ शोथः । यथा,—
"कटुतैलान्वितैर्लेपात् सर्पनिर्म्मोकभस्मभिः ।
चयः शाम्यति गण्डस्य प्रकोपः स्फुटति द्रुतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)

चर, गमने । अदने । आचारे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चरति । इति दुर्गादासः ॥

चर, क संशीत्यसंशीत्योः । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) संशीतिः संशयः । असंशीतिरसंशयः । क, विचारयति यो धर्म्ममिति हलायुधः । चर असंशये । इति प्राञ्चः । केचित्तु संशये इति पठित्वा संशये हि विचारणा स्यादित्याहुः । इति दुर्गादासः ॥

चरः, पुं, (चरति स्वपरराष्ट्रस्य शुभाशुभज्ञानाय भ्राम्यतीति । चर + अच् ।) राष्ट्रादेः शुभाशुभादिज्ञानार्थं राज्ञा सगोपनं नियुक्तः पुरुषः । परतत्त्वज्ञानार्थभ्रमणकर्त्ता । तत्पर्य्यायः । यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ स्पशः ६ गूढ़पुरुषः ७ । इत्यमरः । २ । ८ । १३ ॥ अपसर्पकः ८ प्रतिष्कः ९ प्रतिष्कशः १० चारगतिः ११ मन्त्रगूढ़ः १२ हितप्रणीः १३ । इति शब्दरत्नावली ॥ उदास्थितः १४ । इति जटाधरः ॥ तद्भावो भिक्षुवणिगादिवेशेन नित्यस्थायिनि चरे । चर स्वदेशपरदेशभ्रमणशीले द्रष्टव्ये । इति भरतः ॥ तस्य लक्षणं यथा,—